॥ गीताध्यानम् ॥

ओम् पार्थाय प्रतिबोधिताम् भगवता नारायणेन स्वयम् व्यासेन ग्रथिताम्
पुराणमुनिना मध्ये महाभारतम् ।
द्वैताम्रुतवर्षिणीम् भगवतीम् अष्टादशाध्यायिनीम् अम्ब त्वामनुसन्दधामि भगवद्गीते
भवद्वेषिणीम् ॥ १

नमो–स्तु ते व्यास विशालबुद्धे फुल्लारविन्दायत पत्रनेत्र ।
येन त्वया भारततैल पूर्णः प्रज्वालितो घ्यानमयः प्रदीपः ॥ २

प्रपन्न पारिजाताय तोत्रवेत्रै कपाणये ।
घ्यानमुद्राय क्रुष्णाय गीता–म्रुत्दुहे नमः ॥ ३

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धम् गीताम्रुतम् महत् ॥ ४

वसुदेवसुतम् देवम् कम्सचाणूर मर्दनम् ।
देवकी परमानन्दम् क्रुष्णम् वन्दे जगद्गुरुम् ॥ ५

भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोत्पला शल्यग्राहवती क्रुपेण वहनी कर्णेन
वेलाकुला ।
अश्वत्थाम विकर्ण घोरमकरा दुर्योधनावर्तिनी सोत्तीर्णा खलु पाण्डवै रणनदी
कैवर्तकः केशवः ॥ ६

पाराशर्य वचस्सरोजममलम् गीतार्थगन्धोत्कटम् नानाख्यानककेसरम् हरिकथा
सम्बोधनाबोधितम् ।
लोके सज्जन षट्पदैरहरहः पेपीयमानम् मुदा भूयाद् भारतपन्नकजम्
कलिमलप्रध्वम्सि नः श्रेयसे ॥ ७

मूकम् करोति वाचालम् पन्गुम् लन्घयते गिरिम् ।
यत्क्रुपा तमहम् वन्दे परमानन्द माधवम् ॥ ८

यम् ब्रह्मा वरुनॆन्द्र रुद्र मरुतः स्तुन्वन्ति दिव्यैः स्तवैः ।
वॆदैः सान्गपदक्रमॊपनिषदैः गायन्ति यम् सामगाः ॥
ध्यानावस्थित तद्गतॆन मनसा पश्यन्ति यम् यॊगिनॊ यस्यान्तम् न विदुः
सुरासुरगणाः दॆवाय तस्मै नमः ॥ ९